२३ तदिदं नमः = अयं नमस्कारः = एवं अत्यन्त विरुद्ध स्वभावस्य अस्मदुक्तिभिः कथमपि निरूपयितुं असंभवात्, सर्वत्र नमस्कार एव करणीयः इति प्रदर्शनाय नमस्कार शब्दस्य वृत्तिः - तत् (= परोक्षं), इदं (= अपरोक्षं) इति प्रकारेण गति सर्वं यस्य सः = तदिदमिति सर्वः तस्मै = सर्वात्मभूताय तुभ्यं नमः

२ ६ १ ३ ४ ५
बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः॥

७ ६ ८ ९ १०
प्रबल तमसे तत्संहारे हराय नमो नमः॥

११ १२ स्थितौ १३ १४ १५
जन सुखकृते सत्वोत्पत्तौ मृडाय नमो नमः॥

१६ १७ १८ १९ २०
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः॥३०॥

१-५ विश्वोत्पत्तौ बहुलरजसे भवाय नमोनमः;
६-१० तत्संहारे प्रबलतमसे हराय नमोनमः;
११-१५ जनसुखकृते सत्वोत्पत्तौ मृडाय नमोनमः;
१६-२० प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमोनमः॥

१ विश्वोत्पत्तौ = जगत सृष्टौ कर्तव्यतायाम्॥
२ बहुलरजसे = अधिकरजोगुणाय - उद्रिक्त रजसे = ब्रह्मरूपाय.
६ तत्संहारे = जगन्नाशे.
७ प्रबलतमसे = अधिकतमोगुणाय = रुद्रमूर्तये
११ जनसुखकृते = जगत पालने = जनहित[illegible]य.
१२ सत्वोत्पत्तौ (स्थितौ) = सत्वगुणस्य उत्पत्तौ उद्रेके आधिक्ये
१३ = सुखदातारे मृडरूपं.
१६ प्रमहसि पदे = प्रकृष्ट तेजःपुंज रूपे
१७ निस्त्रैगुण्ये = गुणत्रयातीते = प्राकृत स्थाने.
१८ शिवाय = मंगलरूपाय
४,५; ९,१०; १४,१५; १९-२०, नमोनमः इति प्रकृत्य तित्रायेन
वीप्सायां द्वित्वं.

शापरिणतचेतः क्लेशवश्यं क्व चेदं।
च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः॥
ति चकितममन्दीकृत्य मां भक्तिराधात्
रदचरणयोस्ते वाक्यपुष्पोपहारम्॥ ३१॥

(श्लोक अधिक - शिवरहस्य ६ पूर्वार्ध-१३) —
" वपुः प्रादुर्भावादनुमितं जन्मनि पुरा ॥
पुरारे न क्वापि क्षणमपि भवन्तं प्रणतवान् ॥
नमन् मुक्तः सम्प्रत्यहमतनुरग्रेऽप्यनतिमान् ॥
इतीश क्षन्तव्यं तदिदमपराधद्वयमपि ॥" ३३

क्लेशवश्य = दुःखपराधीन — क्लेशाः पंच
अविद्या अस्मिता राग द्वेष अभिनिवेशाः॥ =
अविद्या = विपरीत ज्ञानं ॥,
अस्मिता = भिन्नयो बुद्ध्यात्मनोरेकत्र प्रतीतिः॥,
रागः = सुखेषु आसक्तिः,
द्वेषः = दुःखेषु अप्रीतिः,
अभिनिवेशः = अनुभूतादपि मरणादेस्त्रासः॥.
क्लेशपरिणत चेतः = क्लेशानां परिणति (=परिपाको यस्य) तत्तथाभूतं चित्
= सुप्रविचारगोचरं.
शश्वत् गुणसीमोल्लङ्घिनी ऋद्धिः = सर्वदा गुणमर्यादातीत
कान्ता = अविनाशिनी तव ऋद्धिः = महिमा.
चकितं = भीतं
(मां) अमन्दीकृत्य = भीति रहितं कृत्वा
वाक्यपुष्पोपहारं = वाक्यान्येव पुष्पाणि, तेषां उपहारं (=पूजां)
आधात् = अकरोत् = अर्पितवती (भक्तिः)

बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः॥
प्रबलतमसे तत्संहारे हराय नमो नमः॥
जनसुखकृते सत्वोत्पत्तौ मृडाय नमो नमः॥
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः॥३०॥

(नमस्कार / प्रणाम महिमा — शंकराचार्यांनी गीता टीकेत —)
"लोकत्रयाधिपतिमप्रतिमप्रभावम्॥
ईषत्प्रणम्य शिरसा प्रभविष्णुमीशम्॥
जन्मान्तरप्रलयकल्पसहस्रजातम्॥
आशु प्रणाशमुपयाति नरस्य पापम्॥" (भक्तामर)

११ जनसुखकृते = जगत्पालन = जनहितार्थाय.
१२ सत्वोत्पत्तौ = सत्वगुणस्य उत्पत्तौ (उत्कर्षे) आधिक्ये
१३ = ... व्यक्त स्थानी ... कर्तारं मृडरूपं.
१६ प्रमहसि पदे = प्रकृष्ट तेजःपुंज रूपे
१७ निस्त्रैगुण्ये = गुणत्रयातीते = अद्वितीय स्थाने.
१८ शिवाय = मंगलरूपाय
४,५; ९,१०; १४,१५; १९-२०, नमोनमः इति भक्त्यतिशयेन वीप्सार्थी द्विरुक्ति.

३१

कृशपरिणतचेतः क्लेशवश्यं क्व चेदं।
क्व च तव गुणसीमोल्लंघिनी शश्वदृद्धिः॥
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद चरणयोस्ते वाक्यपुष्पोपहारम्॥ ३१॥

१ वरद = हे वरद,
२-४ क्व चेदं क्लेशवश्यं कृशपरिणत चेतः,
५-९ क्व च शश्वद् गुणसीमोल्लंघिनी तव ऋद्धिः,
१०-११ इति चकितं मां,
१३-१६ ते चरणयोः भक्तिः (मां) अमन्दीकृत्य,
१४-१८ वाक्यपुष्पोपहारं आधात॥

कृश रंद = मम चेतः
क्लेशवश्यं = दुःखपराधीनं — (क्लेशाः पंच —
अविद्या अस्मिता राग द्वेष अभिनिवेशाः॥ =
अविद्या = विपरीत ज्ञानं॥
अस्मिता = भिन्नयोर्बुध्द्यात्मनोरेकत्र प्रतीतिः॥)
रागः = सुखेषु आसक्तिः,
द्वेषः = दुःखेषु अप्रीतिः,
अभिनिवेशः = अनुभूतादपि मरणाद् त्रासः॥
कृशपरिणत चेतः = कृशा परिणति (= परिकर्मा यस्य) तत्तथाभिकं चित्त
= स्वल्पविचारगोचरं.
-९ शश्वद् गुणसीमोल्लंघिनी ऋद्धिः = सर्वदा गुणमर्यादातीत
कालता = अविनाशिनी तव ऋद्धिः = महिमा.
चकितं = भीतं
(मां) अमन्दीकृत्य = भीति रहितं कृत्वा.
वाक्यपुष्पोपहारं = वाक्यान्येव पुष्पाणि, तेषां उपहारं (= पूजां)
१८ आधात = [illegible] = अर्पितवती (भक्तिः)

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे।
सुरतरुवरशाखा लेखनी, पत्रमुर्वी ।।
लिखति यदि गृहीत्वा शारदा सार्वकालं ।।
तदपि तव गुणानामीश पारं न याति ।।३२।।

१ ईश = हे ईश
२-६ यदि सिन्धुपात्रे असितगिरिसमं कज्जलं स्यात्,
७-८ (यदि) सुरतरुवरशाखा लेखनी (स्यात्)
९-१४ (यदि) शारदा उर्वीपत्रं गृहीत्वा सार्वकालं लिखति,
१५-२० तदपि तव गुणानां पारं, न याति -

४ = असित गिरि समं = नील गिरि तुल्यं.
१८-२० पारं न याति = अन्तं न प्राप्नोति.

असुर सुर मुनीन्द्रै रर्चितस्येन्दुमौलेः।
ग्रथित गुण महिम्नो, निर्गुणस्येश्वरस्य।
सकल गुण वरिष्ठः पुष्पदन्ताभिधानो।
रुचिर मलघुवृत्तैः स्तोत्र मेतच्चकार ॥३३॥

१-२ असुर सुर मुनीन्द्रैः अर्चितस्य (इन्दुमौलेः),
३ ग्रथित गुण महिम्नः (इन्दुमौलेः)
४-६ निर्गुणस्य ईश्वरस्य इन्दुमौलेः
७-८ एतत् रुचिरं स्तोत्रं
१० सकल गुण वरिष्ठः पुष्पदन्ताभिधानः
१२-१३ अलघुवृत्तैः चकार

१-२ असुर सुर मुनीन्द्रैः अर्चितस्य = असुरैश्च सुरैश्च मुनीन्द्रैश्च (अथवा असुरेन्द्रैः सुरेन्द्रैः मुनीन्द्रैश्च) अर्चितस्य (पूजितस्य (इन्दुमौलेः = शिवस्य)
ग्रथित गुण महिम्नः =

१२ अलघुवृत्तैः = दीर्घ छन्दैः

कुसुमदशननामा सर्वगन्धर्वराजः।
शिशुशशिधरमौळे र्देवदेवस्य दासः॥
स गुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्॥
स्तवनमिदमकार्षीद् दिव्यदिव्यं महिम्नः॥

1,2 कुसुमदशननामा, ~~कुसुमदशन~~ सर्वगन्धर्वराजः
3-5 शिशुशशिधरमौळेः देवदेवस्य दासः
6-8 स एव अस्य (देवदेवस्य) रोषात्,
10,11 गुरुनिजमहिम्नः भ्रष्टः (सन्), 12
12-16 इदं, महिम्नः दिव्यदिव्यं स्तवनं, अकार्षीत्.

1- कुसुमदशननामा = पुष्पदन्तः, गंधर्वराज = गन्धर्वाणां राजा.
3 शिशुशशिधरमौळेः = बालचंद्रं मौळौ यः धारयति सः तस्य शिवस्य
4 देवदेवस्य = महादेवस्य (दासः) देवदेवस्य रोषात् = कोपात्
6 स एव = पुष्पदन्तः. अस्य रोषात् = देवदेवस्य रोषात् = कोपात्
10-11 गुरुनिजमहिम्नः = [illegible] भ्रष्टः = [illegible] सन्

सुमदशननामा सर्वगन्धर्वराजः॥
शुशशिधरमौळे देवदेवस्य दासः॥
गुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्॥
वनमिदमकार्षीद् दिव्यदिव्यं महिम्नः॥

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं ॥
पठति यदि मनुष्यः प्रांजलिर्नान्यचेताः ॥
व्रजति शिवसमीपं किन्नरैः स्तूयमानः ।
स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥ ३७ ॥

१-६ पुष्पदन्तप्रणीतं, अमोघं, सुरवरमुनिपूज्यं, स्वर्गमोक्षैकहेतुं इदं स्तवनं,
७-११ यदि मनुष्यः, नान्यचेताः प्रांजलिः (सन्) पठति,
१२,१३ (स मनुष्यः) किन्नरैः स्तूयमानः (सन्),
१४-१५ शिवसमीपं व्रजति

१ पुष्पदन्तप्रणीतं = पुष्पदन्तेन रचितं (स्तवनं)
२ अमोघं (स्तवनं) = सत्येन फलप्रदं
३ सुरवरमुनिपूज्यं (स्तवनं) = सुरश्रेष्ठैः मुनिभिश्च पूज्यं = (आदरणीयं) (स्तवनं = स्तोत्रं)
४ स्वर्गमोक्षैकहेतुं = स्वर्गमोक्षयोः प्राप्तेः मुख्यत्वेन कारणं
५,६ इदं स्तवनं = इदं स्तोत्रं
७,८ यदि मनुष्यः
९ नान्यचेताः = एकाग्रमनसा.
१०,११ प्रांजलिः (सन्) पठति
१२,१४ (सः मनुष्यः) किन्नरैः स्तूयमानः (सन्)
शिवसमीपं व्रजति

श्री पुष्पदन्तमुखपंकजनिर्गतेन ।
स्तोत्रेण किल्बिषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन ।
सुप्रीणितो भवति भूतपतिर्महेशः ॥ ४२ ॥

१ श्री पुष्पदन्त मुखपंकजनिर्गतेन (स्तोत्रेण)
२,३ किल्बिष हरेण हरप्रियेण (स्तोत्रेण)
४,५ कण्ठस्थितेन स्तोत्रेण,
६,७ समाहितेन पठितेन,
८-११ भूतपतिः महेशः सुप्रीणितो भवति

१ श्रीपुष्पदन्तमुखपंकजनिर्गतेन = पुष्पदन्त निर्मितेन (स्तोत्रेण)
२ किल्बिषहरेण = पापनाशकेन (स्तोत्रेण)
३ हरप्रियेण = शंकर प्रियकरेण (स्तोत्रेण)
४-५ कण्ठस्थितेन स्तोत्रेण = मुखाग्र पाठेन
६,७ समाहितेन पठितेन = निश्चलमनसा पाठेन
८-९ भूतपतिः = (सर्व प्राणिनां पालकः) (महेश्वरः)
१०,११ सुप्रीणितो भवति = प्रसन्नो भवति.

इत्येषा वाङ्मयी पूजा, श्रीमच्छंकरपादयोः ॥
अर्पिता, तेन देवेशः प्रीयतां श्रीसदाशिवः ॥

इति एषा वाङ्मयी पूजा,
श्रीमत् शंकरपादयोः (प्रति) अर्पिता,
तेन (= अर्पणेन) देवेशः श्रीसदाशिवः
प्रीयताम् (= प्रसन्नो भवतु.)

५५ तव तत्वं न जानामि कीदृशोऽसि महेश्वर ॥
यादृशोऽसि महादेव तादृशाय नमोनमः ॥

५६ एककालं द्विकालं वा त्रिकालं यः पठेन्नरः ।
सर्व पाप विनिर्मुक्तः शिवलोके महीयते ॥

शिवरहस्य सप्तमांश पूर्वार्ध अध्याय ७ में अधिक पाठ —

(१) ~~[illegible]~~ उपक्रममे — हिमालयस्थ गौरी स्थापित (गौरीनाथ) लिंगके पास पुष्पदंत गन्धर्वके उग्र तप से उसी लिंगमेंसे आविर्भूत शिवका पूजन नमस्कार करके स्तुति करे है :

(२) श्लोक २१ के बाद —
"सतां धर्मं त्यक्त्वा श्रुति समभिगम्यं सहभुवं ॥
धृणान्न प्युन्मूल्य स्वजन विषय स्नेह गुणितां ॥
द्विजः कृत्वा पादे पितरमपराधं त्वयि विभो ॥
मनुष्यतां सद्यस्त्रि दशपरिणामेन विजहौ ॥२२॥"

(३) श्लोक ३१ के बाद —
"वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा ॥
पुरारे न क्वापि क्षणमपि भवन्तं प्रणतवान् ॥
नमन् मुक्तः संप्रत्यहमतनुरग्रेऽप्यनतिमान् ॥
महेश क्षन्तव्यं तदिदमपराधद्वयमपि ॥३३॥"

(४) श्लोक ३२ के बाद, यथाक्रम ("असितगिरि॰" "अहरहर॰") के बाद "महेशान्नापरो॰" — पुष्पदन्त वाक्य समाप्त करके कश्यपवचनोंमे "दीक्षा दानं तपस्तीर्थं॰" (के) श्लोक है।

"कश्चित् किल गन्धर्वराजः कस्यचिद्राज्ञः प्रमदावनकुसुमानि प्रतिदिनं हरन्नासीत्। तज्ज्ञानाय, शिवनिर्माल्यलंघनेन मनुष्यचौरस्यान्तर्धानादिका सर्वापि शक्तिर्विनश्यति, – इत्यभिप्रायेण राज्ञा शिवनिर्माल्यं पथि निक्षिप्तम्॥ तदनभिसन्धाय च गन्धर्वराजः, तत्र प्रविशन्नेव कुण्ठितशक्तिर्बभूव॥ ततश्च शिवनिर्माल्यलंघनेनैव ममैतादृशं वैकुण्ठ्यं, इति प्रणिधानेन विदित्वा, परमकारुणिकं भगवन्तं सर्वकामदं तुष्टाव॥"

अन्यच्च काशीकेदारखण्डे – नैगमेयगणः शिवपार्वत्योः रहस्यवार्तां श्रुत्वा, विष्णुं लक्ष्मीं च ब्रवीति स्म – एतद् वृत्तान्तं पार्वती निश्चित्य, मनुष्यत्वं प्राप्नुतान् शशाप॥ स गन्धर्वराजः नैगमेयगणः सोमदत्तो बभूव, स च विप्रस्वरूप-तारं व्यासं निंदयित्वा, केदारेशं च पूजयित्वा, शापमुक्तो बभूव॥ ततः स कैलासं यातुं उद्यतः सन् केदारेशं तुष्टाव महिम्नस्तुत्या. तस्य च परमसुरसवर्णितया पुष्पदन्तः इति शिवेन नाम

चकितं अभिधत्ते = भीतं यथास्यात्तथा तात्पर्येण प्रतिपादयति.

अतद्व्यावृत्त्या = (१) अभेदेन "सर्वं खल्विदं ब्रह्म", "सर्वकर्मा सर्वसाक्षी" इत्यादिना सर्वाभेदेनैव प्रतिपादयति, न तु तथैवकशो महिमानं वदति:
(२) जहदजहल्लक्षणया.

अर्वाचीने = नवीने = शिवया गृहीते वृषभ पिनाक पार्वत्यादि विशेषणात्.

पतति = (१) आविशति.
(२) अपतति - अप (= गतौ) तति: = विस्तारो यस्मात् = संकुचितं

३ (मधुसूदन ०)

१ ब्रह्मन् = विभो.

४,५ परममृतं = निरतिशयामृतवत् अत्यास्वाद्यं.
(एतेन अर्थगतमाधुर्यमुक्तम्)

७ सुरगुरोः = ब्रह्मणः = हिरण्यगर्भस्य.

१२ विस्मयपदं = चमत्कार कारणं

२० पुनामि = निर्मलीकरोमि.

२४ व्यवसिता = उद्यता

विष्णुपक्षे.

१३ पुरमथन = मथ्यते अस्मि[illegible]न् दध्यादि-
इति मथनं = गोकुलं — अथवा
मथ्नाति आपोऽमृतार्थं इति मथनः
= क्षीरोदः ; पुरं मन्दिरं = गोकुलं
क्षीरोदो वा यस्य

२ महोक्षः = महानुक्षा = वृद्धवृषभः

३ खट्वाङ्गं = खट्वाया अवयवः शस्त्रविशेषः कापालिकानां प्रसिद्धः

४ परशुः = टङ्कः कुठारो वा

५ अजिनं = चर्म

८ कपालं = मनुष्य शिरोऽस्थि

(महोक्षादिः महेश्वरस्वरूपस्य ध्यानार्थं)
(वस्तुतस्तु पुरुष प्रधान महत् अहंकार तन्मात्र इन्द्रिय भूतानि महोक्षादिरूपेण गृहीत्वानि भगवन्तं महेशं उपासते इत्यागमप्रसिद्धम् = तस्य जगत्कर्तुः तस्य तत्वान्येवोपकरणं इति निष्कर्षः)

हरिपक्षे

२ महोक्षः = महः (=तेजोरूपः) अक्षः (रथावयव-चक्रं) = तेजोरूपाक्षः

६, ७, ५ + अंगं = त्रयी = भस्म (=भस्मवन्मृतम्) (१) कपिलः = [illegible] शेषस्य) अजिनं अंगं (=शरीरं त्वक्) खट्वा (=शय्या) (२) [illegible]

८ कपालं (१) कं (शिरः) पाल्यते अनेन इति कपालं = शिरस्त्रधानं.

(२) केन (=जलेन) पाल्यते इति कपालं पश्चिमं वा

हरिविषये:-

१ त्रिपुरहर = हे मोक्षप्रद विष्णो - त्रीणि (जाग्रत स्वप्न सुषुप्ति आख्यानि) पुराणि (भक्तानां जीवां स्वसेवाकारेण हरतीति) = त्रिपुरहर = विष्णो.

१२ स्थिरतया त्वद्भक्तेः = अनेक कल्प व्यवधानेऽपि यावत्कल्पपर्यन्तं स्थायित्वात् ... विस्फूर्जितमिदं = ... अभूत् तत् त्वद्भक्तेरेव प्रभावोऽयम्.. — त्वदीय वैकुण्ठपुरे द्वारपाल ... पार्षद प्रवरस्य, ... व्याजेन, ... आसुरी योनिमनुभवतोऽपि रावणस्य, त्वद्भक्तिप्रभावादेव निरतिशयं पौरुषं.

१३ शिरःपद्मश्रेणी रचितचरणाम्भोरुहबलेः = तथा च बलेः (वैरोचनेः) त्वद्भक्तेर्विस्फूर्जितमिदं (= याग ... त्वरान्, ... तोयदान, ... त्वच्चरणाब्ज स्पर्शनादि एतत्सर्वं सूचयन् सं बोधयति) बले शिरः एव पद्मश्रेणी (= पद्ममयी निःश्रेणि (= पाद विक्षेपभूमिः) तस्यां रचितं (= अर्पितं) चरणाम्भोरुहं येन स बलेः — (योगपद्मपीठे हि भगवच्चरणारविन्दं ... — इति शास्त्र प्रसिद्धेः) भगवत् चरणारविन्द धारत्वेन, बलेः शिरोऽपि पद्मपीठत्वेन निरूपितं.

त्रिरः तादृशस्य नित्यसापेक्षत्वाच्चात्र सापेक्षसमासो।
न दोषाय, देव इत्यस्य गुरुकुलमितिवत् —
वोलिने। स्वस्य धामनावतार प्रार्थनया। पदत्रयमेतत्
भूमि देवा – इति प्रतिकृपतं; तत्र पदद्वये नैव
सर्वस्मिन् जगति भगवता स्नाने, स्व भक्तपालनाय
तृतीय पद स्थाने स्व शिरः दत्तं बलिना इतं,
तच्च भगवता स्वपादाम्बुजभावेन्द्र – इति पुराण
प्रसिद्धं – न खलु ईशः प्रसाहे ब्रह्मादिभिरपि
लब्धोऽस्ति – तस्मात् बलिकृतार्थः त्वद्
भक्तेरेव प्रभावो यम्।

हरिपद्धे

कैलासे = केलिः (=क्रीडा) सैव प्रयोजनमस्य इति कैलः; असिः (=खड्गः) यस्य सः कैलासिः, (इच्छामात्रेण विजित सर्वशत्रोरपि, तव, क्रीडार्थमेव नन्दक धारणं इत्यर्थः

अमुष्य = बलेः

अधिवसतौ = स्थितिमात्रे, तव स्वबालपन भूतेऽपि त्रैलोक्ये, आक्रान्त्या सीमानं त्रैलोक्यमिति विस्मरमाणात्

भुजवनं = हस्तौ इव

विश्रमयतः = मम स्वत्वत्यागपूर्वकं, दातव्य प्रतिगृहीतुः, स्वत्वं उत्पादयामि इत्यभिप्रायेण भगवतः पाणौ, उदकं प्र यच्छतः

त्वत्सेवा समधिगतसारं (भुजवनं) = त्वत्सेवया समधिगत सारः (= सौभाग्यविशेषः) येन तत्तथा - तव पाणिपद्मसंबंधेन, अतितरां शोभमानमुदकं

तथा च सर्वजगन्निवासस्य तव विलासभूमिं भूत्, तत् स्वकीयमिति मत्वा, तुभ्यं दत्तो बलेः, महानेवापराधः

त्वया तु परमकारुणिकेन प्रतिज्ञात त्रिक्रमत्रय-
मित भूमि दाने ऽपि तस्य असामर्थ्यं आसाद्य, तस्य
महतां निकृतये, योऽस्य एव हेतुः ध्रुवः इत्याह

८-२ त्वयि अलसचलितांगुष्ठशिरसि (सति) =
अलसं (संथ) -चलितः (=कंपितः) अंगुष्ठः
(बोट) शिरसि येन – तस्मिन् सति.

१२-१४ (तस्य) प्रतिष्ठा पाताले ऽपि अलभ्या आसीत् =
(१) तस्य स्थितिः पाताले ऽपि अलभ्या आसीत्
का वार्ता स्वर्गमर्त्ययोः ;
(२) अथवा पाताले विद्यमानस्यापि बलेः,
इन्द्रादिभिः अलभ्या प्रतिष्ठा आसीत्.
तत्र भगवतः सर्वदा सन्निहितत्वात्.

१३ (मधुसूदन०)

हरिपक्षे

(हे) परम वैरद =

सुत्राम्णः (= इन्द्रस्य) बाणः (= शरः, अत्र बाण इति शस्त्रमात्रोपलक्षणं) अंधः सतीं ऋद्धिं (= संपत्तिं) उच्चैः (= त्रिभुवन व्यापिनीं) चक्रे (= कृतवान्) ; तत् तस्मिन् (= सुत्राम्णि) न चित्रं = त्वत्प्रसादादेव सर्वानसुरानेकेनापि बाणेन जित्वा त्रिभुवनराज्यं इन्द्रः प्राप्तवान्.

परिजनविधेयं (= आयत्तं) त्रिभुवनं यस्मात् स तथा बाणः (शरः)

(शेषं पूर्ववत्)

हरिपक्षे -

हे [15] ईश्वर सुर-सर्वविलक्षण देव

पूर्वं स्मर्तव्यात्मा सुतोऽपि स्मरः (=कामः)

त्वां पश्यन् अभूत् (=जातः)=त्वत्सकाशा
ज्जातः - पितेव खलु पुत्रं
जातमात्रमेव लोकयति, अतः पुत्रोऽपि
तमेवाव लोकयतीति पश्यन् अभूत्
इत्यनेन जन्यजनकभावो लभ्यते.

कथं जातः? साधारणं ~~[illegible]~~ तव तुल्यं
रूपं यथा स्यात्तथा - 'आत्मा वै पुत्रना
मासि' इतिश्रुतेः. तर्हि सर्वांशेन
भगवत्तुल्यः? - तथा च "न तस्य प्र
तिमास्ति यस्य नाम महद्यशः", "न त
त्समश्चाभ्यधिकश्च दृश्यते" - इत्यादि
श्रुतिविरोधः - इत्याशंक्य वैलक्षण्यमाह
- नहीत्यादि -

वशीषु (=जितेन्द्रियेषु) हि (=यस्मात्)
स्मरो न पथ्यः (=न हितः)

तत्र हेतुः परिभवः (=परिभवलनर्थे
योजयतीति परिभवः) कामः स खलु
सर्वेषां संसारबन्धहेतुः, परमेश्वरस्तु
सर्वेषां संसारबन्धस्यात्यन्तोच्छेदहेतुः -

-इति महद्वैलक्षण्यं श्रुत्यर्थं

— (श्रोसंप्रवेदयत्)

२-३ जगद्रक्षायै नृत्यसि (=नृत्यसि) – संध्यायां जगन्ति
जिघांसन्तं गरलमिव तत्कालकूटं महाराक्षसं
निज ताण्डवेन मोहयसि.

हरी पक्षे

७ नटीसि (= नटवद्व्यवहरसि =) मत्स्यादिरूपैः
भजसि.

४,५-८ महीपात आघातात् = महीं पातीति
महीपः (=राजा) तस्मात् = महीपात्,
आ (समन्तात्) घातो (=आघातः) अस्मा
त् – इति; – सा मही सद्य (तत्काल
मेव) संशयपदं व्रजति – यथा च
यदैव हिंस्रस्य राज्यं तदैव संकटं
व्रजतीत्यर्थः ; तथा च –

९,१० विष्णोः पदं (=अधिष्ठानं) = यत्र भगवान्
विष्णुः सन्निहितो भवति, तद्
विष्णोः पदं = देवमन्दिरादि [illegible]
(तत्कीर्त्यां) भ्राम्यद्भुजगपरि [illegible]
= भ्राम्यद्भिः भुजङ्गस्य परिधेः (उत्तरीय [illegible])
[illegible] (=भग्नः) [illegible] (सोमपात्र [illegible] हीनः)
सोमपात्र [illegible] हीनः) यत्र तत्तथा = [illegible]
[illegible] यत्र [illegible] तत्र इत्यर्थः.

R,15,71 (तथा) श्री [illegible] यालि

११ अनिभृतजरा ताडित तटा = अनिभृतजरा: पाखण्ड व्रत चिह्नभूता:, ताभि: आताडितं (= अभावमिव गमितं) तटं (= तुगपद्ड्रस्थ्य[illegible]) यस्या सा तथा. पाखण्डिभि: वैकुण्ठलोकोऽपि नांगीक्रियते, किं पुनरन्ये लोका: इत्यर्थ: .

— यद्वा पूर्वं तथा त्वं नष्टब्रह्मचर्यसि.

" यहालये ह्यपि सतां न कथा हरे: स्यु: ।
पाखण्डिनो द्विजजना, वृषला नदेवा: ॥
स्वाहा स्वधा वषडिति स्म गिरो न यत्र ॥
शास्ता भविष्यति कलेर्भगवान् युगान्ते ॥" (भागवते)

१८ ननु (= निश्चितं)

१७ विभुता (= विभववत्ता = संपन्नता)

१८ वामेव (= वक्रैव)

— सत्यपि [illegible] प्रकारे, वक्रेणैव प्रकारेण, [illegible] सफलतां संपन्नं कार्यं करोति. तथाऽऽविधमैश्वर्यं [illegible] दर्शयन्, भक्तानां [illegible], तानि तानि श्रवणमनोहराणि चरितानि, तेन तेनावताकारा [illegible] भगवान्— [illegible] भाव: ।

१५ (मधुसूदनः०)

हरिपक्षे .

तारागणैर्गुणिताः फेनाः यस्याः सा तारागणगुणितफेना (= गंगा); तस्याः उद्गमे उद्भवे रुचिः (= शोभा) यस्य सः।

(तथा) शिरसि (= सर्वलोकानां शिरःस्थानीये ब्रह्मलोके वा) वलितः ... अंगुष्ठ निर्भिन्न ब्रह्माण्ड विवराद् आगतो गंगेत्यति हेतु वियद्व्यापको यो वारां प्रवाहः स ते त्वया पृषतलघु दृष्टः (सविन्दुरपि लघु दृष्टः) — बिन्दुरपि लघु यथा स्यात्तथो पलब्धः ; इत्यर्थः।

अनेनैव लिंगेन च तव दिव्यं वपुः वलिछलनार्थं दिव्याकाशे आविर्भूतं त्रैविक्रमीय रूपं धृत महिमाऽनिवर्यम् —

वारां (=तोयानां) प्रवाहः (=ओघः) (सः) ते (=त
शिरसि पृषत लघु सृष्टः (=जलकणिकावत् सू
सृष्टः
(कथंभूतः) वियद्व्यापी (=व्योमवत् व्यापनशीलः)
(पुनः किंभूतः) तारागण गुणित फेनोद्गमरुचिः (=त
(=नक्षत्राणि) तारागणः (समूहः) तेन गुणि
उपमितम् = शक्तिलाभतियावत् (?), फेनो
स्य (=डिंडीरोत्पत्तेः) रुचिः (=शोभा) य
(तेन प्रवाहेण) जगत् द्वीपाकारं कृतं = जलमध्य
स्थितो भूखंडो द्वीपः, तद्रूपमकारि.
(किंभूतं) जलधिवलयं = जलधिः (समुद्रः)
(=परिखा यस्य तत्)
अनेनैव (=हेतुना) तव दिव्यं (=सद्दानंदात्मकं)
(=शरीरं) धृतमहिम इति ज्ञेयं (=ज्ञा
(धृतो भृतो महिमा (सर्वज्ञत्वं सर्वश
क्ति) येन तत्)

१-३,१७,१८
त्रिपुरहा– त्रीणि त्रिकूटगिरिशिखराणि -पुराणि,
आश्रयो यस्य - इति [redacted] त्रिपुरं = लंकापुरं,
तदेव तूणं, तद्[illegible] स्तन. कोऽयं –
श्रीराम रूपेण, सुग्रीव सख्य, समुद्रबंधनादि
आडंबर विधिः

४-१५ क्षोणी-इत्यादि रूपकं –

क्षोणी इव रथः, शतधृतिरिव यन्ता,
अगेन्द्र इव धनुः, चंद्रार्कौ इव रथचक्रे,
रथचरणपाणिरिव शरः स्वतुल्यवीर्यो
बाणः – इत्यर्थः

क्षोण्यादिसदृश रथाद्युपादानं – एतादृश
अल्पप्रयोजनाय अपेक्षितुं, उचितं
न भवति – इत्यर्थः

–(शेषं पूर्ववत्)

हरीपक्षे

१ त्रिपुर हर (= त्रिपुरं = त्रिकूटशिखराणि त्रिपुरं, तद् हरति यः सः राम

४ हरि: (= इन्द्रः)

१२, ५-८ नेत्रकमलं सहस्र कमलबलि माधाय = नेत्राण्येव कमलानि यस्मिन् स तथा नेत्र सहस्रात्मकं कमल सहस्र बलिं = युगपत् नेत्रसहस्र व्यापारेण, त्वच्चरणयोः दर्शनरूपमाराधनं कृत्वा – इत्यर्थ,

८, ११ शकः ॰ निजमात्मानं शेकः = सहाया-ऽन्तरशून्यः

७, ८ अनेनास्मिन् = एतल्लोकविलक्षणे = स्वर्ग लोके ·

१३ उद्द हरद् = उधृतवान् = स्वर्गाधिपतिं आत्मानं कृतवान्.

– निजं उद्धर्तुं युगपन्नेत्रसहस्रेण त्वच्चरणावलोकने, यत् प्रवणत्वं, सैव भक्तपुद्रेकः —

१४ असौ भक्त्युद्रेकः
चन्द्रके वपुषा परिणतिं गतः = असौ भ[illegible]
क्त्युद्रेकः, चन्द्रवपुषा (= चन्द्रं = सैन्यं = ऐरावतौ [illegible] अभ्याते; तद्रूपेण)
परिणतिं गतः (= समुद्रमथनेन लक्ष्मी पीयूषादि प्रादुर्भावात्)

(शेषं पूर्ववत्)

२१ (मधुसूदन०)

हरिपक्षे.

तनुभृतामधीशः क्रतुपति =

(१) तनुं (=स्वशरीरमेव) बिभृति (=पुष्णान्ति) इति तनुभृतो (=दैत्याः देवबाह्या, तेहि सुरगमिभ्यो भयभ्यजन्ति, सर्वेहि सया स्वशरीमेव पुष्णान्ति) तेषां अधीशः = (राजा बलिः) क्रतुपतिः (= यजमानः)

(२) अथवा तनून (=क्षीगाद) बिभृति (=पुष्णन्ति ते तनुभृतः (= बदान्याः) तेषामधीशः (= दातृशीरोग्रगण्यः = बलिः).

३-२ क्रियाद्दशोदक्षः = (क्रियादक्षस्थ उदक्षस्थ) (=उत्कृष्टानि अक्षाणि (=इन्द्रियाणि) यस्य सः (= बलिः)

१०-२ सुरगमाः सहस्याः = सुरेषु (=देवेषु) गच्छन्ति इति सुरगमाः (=देवतुल्याः पुरुषाः) सहस्याः

१५ अधाविधुरं (अद्धाविधुरत्वेन भगवद्गृहीत इन्द्रादि देवगणैः सह विरोधात्) स्वभक्तद्रोहो[illegible] भगवतः स्वद्रोहादप्यधिकः

—(शेषं पूर्ववत्)

हरिपक्षे

) हे नाथ, रोहिद्भूतां गतं प्रजानाथं, दिवं गतमपि, धनुष्पाणे त्वं च मृगं व्याधस्य रोऽद्यापि न त्यजति =

रोहिद्भूतां गतं = रोहितः (हरिण्याः) सकाशात् भवतीति रोहिद्भूः (=हरिणशावकः) तस्य भावो = रोहिद्भूता, तां गतम् (= हरिणशावकतां प्राप्तं)

१० प्रजानाथं = प्रजाः (प्राणिनः) नाथति (= उपतापयति) इति प्रजानाथः (= राक्षसः स च प्रकृते मारीचाख्यः, तं

) (किमर्थं तस्य मृगरूपधारणं इत्यत आह) —

प्रसभं अभिकं रिरमयिषुं = (प्रकृष्टा = शोभायुक्ता) सभा यस्य सः प्रसभः, तं ताद्दृशं); अभिकं (अभितः) कानि (= शिरांसि) यस्य सः अभिकः = रावणः = दशग्रीवः, तं); रिरमयिषुं (= सीतां पापे [illegible] इच्छुं

) (तथा) - स्वां दुहितरं (= अयोनिजां कन्यां = (= सीतां) रिरमयिषुं (= प्रमोदयितुं इच्छुम्) [illegible] मृगशरीरं मां दृष्ट्वा, सीता स्त्रीस्वभावात् अतिमुग्धा, मम ग्रहणार्थं श्रीरामं [illegible] प्रेरयि

यति ; अतो रामे दूरं गते अपसारिते, लक्ष्मणेच

तदन्वेषणार्थं गते, एकाकिनीं सीतां रावणः सुखेन
हरिष्यतीत्यभिप्रायेण धृतविचित्रमृगशरीरं
—इत्यर्थः)

७ (अत एव) : मायेन अपभ्रंशकृतत्वात् दिवं स्वर्लोकं
यातं (= मृतमित्यर्थः)

~ अपि मृतमपि, तव मृगव्याधभसः न त्यजति
— इति उत्प्रेक्षा ध्वनिः)

— (श्लोकार्थः)

२३ (मधुसूदन ०)

यम निरत = हे यमादिनिरत [illegible] = यमनियमादि अष्टांगयोगपरायण (= हे शिव)

त्वं तावत् आशंसा धृत धनुषं (= स्वस्या: पार्वत्या:) वल्लभत्वं (सोऽस्य निश्चय:) तद्विषया आशंसा (= प्रत्याशा) (= पार्वत्या. सोऽहमित्ति शयेन, परम योगिनमपि श्रीरुद्र, वशीकरिष्यामि - इति या प्रत्याशा, तथा निमित्तभूतया) धृत धनुषं (= धृतं धनुः येन (कामेन) इति = तथा तं (कामं)

[illegible] देहार्ध दानात् = (चिरकाल तपः [illegible] विरह [illegible] प्राप्तायै: इति करुणामयेन शिवेन स्वशरीरार्धे अवस्थानात्

स्त्रैणं = (यदि शिवः पार्वत्याः अधीनो न भवेत्, तर्हि कथं स्वके शरीरार्धे स्थापयेत् - इति भ्रान्त्या) स्त्रीसक्तं अवैति = (विशेषदर्शनात् कल्पयति हि)

बत = (अहो)

युवतयः मुग्धाः = (तरुण्यः अनवगतार्थाः)

हरिपक्षे

/ हे अर्धघटना इव = घटना अर्धम् इति अर्धघटना, अर्धपिप्पलीवत्; तस्याः इव (= वह्निः) = दाहकः - सीतारूपायाः लक्ष्म्याः, रामरूपेण उचित संयोगात्, स्वेच्छया अर्धसंयोगं इत्वा, अर्ध विप्रलंभं दग्धवानसि।

/ यम नियत देहा (सीता) = अत्यन्तपतिव्रता.

/ पुर मथन पुष्पा = पुरस्य (= शरीरस्य) मथनानि = पीडकानि पुष्पाणि यस्याः सा तथा = पुष्पाणामपि स्पर्शासहा = अति सुकुमारांगी.

/ स्वलावण्याशं (तम्) = स्व वीर्यं लावण्यं, अत्र शौर्यादि गुणकृतं सौन्दर्यं, तस्मिन् आशा यस्य, सः, तं. = सीतायाः अनुधरणात्, स्वस्य शौर्यादि गुणसिद्धिं गच्छेदिति; स्वकीर्तिरक्षार्थिनं.

/ धृत धनुषं (तम्) = (सज्जीकृत कोदण्डं)

/ अह्नाय तृणवत् पुरः पुष्टं दृष्ट्वा = शीघ्रमेव तृणमिव पुरः (= लंकापुरः) पुष्टं (= दग्धं) दृष्ट्वा.

/ तथा दग्धं = (युद्धमपि दृष्ट्वा).

— स्वकीर्ति रक्षार्थं, अत्यन्त पतिव्रतायाश्च देव्याः कारुण्येन बन्धविमोचनार्थं, सज्जीकृत कोदण्डं, त्वां; अर्धघटनात — एवं, अयं रामः, यदि मद्योगो नभवेत्, तदा कथमेतादृश दुष्कर कर्माणि कुर्यात् मामुद्दिश्यकुर्यात्, — इति भ्रमेण स्त्रीसकल इव कलयति. — (उपसंहार)

हरिपक्षे.

तव नाम स्मर्तॄणां अमंगलम् शीलं भवतु,
तथापि त्वं तेषां परमं मंगलमसि.

अविलं (नाम) = न विलं (=फलरहितं) = अविलं.
= सर्वदा सर्वत्र सफलं — अजामिलादीनां
नामोच्चारणमात्रेण परमपुरुषार्थावाप्तिश्रवणात्.

(भक्तानां अमंगलम् शीलं दर्शयति) —

/ श्मशाने ष्वाक्रीडा — (शव शयन प्रदेशेषु = सर्वदा शोक प्रधानेषु गृहेषु वा) आक्रीडा = (रमित क्रीडा = जन्म कालं वैषयिक, तुच्छ सुख प्राप्तिः)

/ स्मरहराः पिशाचाः सहचराः = (स्मरः स्मरणं = शास्त्रीयो विवेकः, तं हरन्ति — इति स्मरहराः (= पुत्र भार्यादयः), ते एव पिशाचाः (= यथा पिशाचाः स्वावेशेन ज्ञानलोपं कृत्वा, अनर्थं पुरुषं योजयन्ति, तथा पुत्र भार्यादयोऽपि), (तादृशाः च वस्तुगत्या वैरिणोऽपि) सहचराः (= सहैव चरन्ति, न क्षणमपि त्यजन्ति इति सहचराः)

/ चिताभस्मालेपः = (चिताभस्म तुल्यः आलेपः) (देहस्य विण्मूत्र पूयादि पूर्णत्वेन अतिजुगुप्सितत्वात्, तदालेपनस्यापि अतिजुगुप्सितत्वात्)

, स्रगपि नृकरोटी परिकरः (मनुष्य शिरोऽस्थि समूह तुल्या माला, पिशाच तुल्यं भार्यादि स्नेह

हेतुत्वात्.

) अपि शब्दादन्यदपि सर्वं चरितं विषयसंगिनां अमंगळमेव.

— तथाहि यदि अपि चेत्त्वां, त्वन्नाम वा स्मरति, तर्हि तदा त्वमेव तेषां मंगळरूपेण आविर्भवसि, — इति, अहो भक्तवात्सल्यम्.

२५ (मधुसूदन ०)

तृतीय
द्वितीय श्लोकेन,

१ "अतीतः पन्थानं" इति पदार्थत्रयमुपन्यस्तं,
२ "कतिविध गुणः" - इति सगुणमैश्वर्यं,
३ "कस्य विषयः" - इति अद्वितीयब्रह्मस्वरूपं
४ "पदे त्वर्वाचीने" - इति लीला विग्रह विहारादिनीति

चतुर्थश्लोकेन - "भजन्मानो लोकाः" - इति परमेश्वर सद्भावं
दृढीकृतम्.

पञ्चम श्लोकेन - "तवैश्वर्यं यत्तद्" - इति सगुणमैश्वर्यं
लीला विग्रह विहारादिकं च
पितम्

- एतत्सर्वस्य अद्वितीय ब्रह्म स्वरूप वर्णनं बिना,
ग्रंथस्य व्यर्थत्वात् - निर्गुण ब्रह्म निरूपणं विदधाति.
परमानन्दरूपत्वे विद्वदनुभवरूपं प्रत्यक्षप्रमाणं वदति -

-(त्वमेव हरि पदे ...)

~~... ... ...~~ ध्यानेः.

२८ (मधु० सू० उ०)

अ = ऋग्वेद, जाग्रत, भूर्लोक, ब्रह्मा
उ = यजुः " स्वप्न, भुवः, विष्णुः
म = साम " सुषुप्ति, स्वः, महेश्वरः (रुद्रः)

{ माण्डूक्य, नृसिंहतापिनी, अथर्वशिखा, उपनिषदि वेदोक्तानुसारिका (स्वकृता) ...

तस्मात्सर्वं द्वितीयशून्यं प्रत्यगभिन्नं ब्रह्म— प्रणव वाक्यार्थः -

— (... प्येवं)

२८ (मधुसूदन०)

हरि पक्षे ऽप्येवमेव; अथवा –

भवादीनां हरिनामत्वं योगवृत्त्या संभवत्येव;
अथवा यद् इदं अभिधानाष्टकं अमुष्मिन्
अस्त्येव, देवश्रुतिरपि (=देवशब्दो अपि) प्रविचरति
(= संबद्धो भवति); तथा च भव देव इत्यादि
रूपं तव रहस्यनामाष्टकं – इत्यर्थः
तथा च भवस्य (=रुद्रस्य) अपि देव आत्मा
ध्येयः – इत्यर्थः — एवं अन्येषु अपि नाम
सु द्रष्टव्यम् –

---

१७ ^[१५,१६,१८] देवश्रुतिरपि प्रविचरति = अमुष्मिन् नामाष्टके
देवश्रुतिः = देवानां, ब्रह्मादीनामपि, श्रुतिः =(श्रवणे
न्द्रियं) प्रविचरति =(सावधानतया वर्तते)
= देवा अपि तन्नामश्रवणोत्सुकाः, किं
पुनरन्यः – इत्यर्थः

२३ प्रविहित – प्रणिहित – पाठे ऽपि स एवार्थः

२०, २२, २१ ^[१८] भव ते प्रियाय धाम्ने ^[अपि] = हे भव
ते (=तव) प्रियाय अस्मै धाम्ने = पूर्वश्लोक
कथित धाम्ने = तेजोरूपाय

२८ (मधुसूदन)

हरिपक्षे.

१ प्रियदव = प्रियाणि वैषयिक सुखानि, वैराग्य बोधेन, दुनोति = नाशयति इति प्रियदव.

२ स्मरहर = स्मरः (वासना), तां हरति स्व भक्तत्युद्देशेण – इति स्मरहर

३ त्रिनयन = त्रयाणां लोकानां नयनवत् सर्वविभासक.

— (शेषं पूर्ववत्)

महिम्न स्तोत्र श्लोकानां अकारादि कोशः

श्लोकांकः

अकाण्ड ब्रह्माण्ड १४
अजन्मानो लोकाः ६
अतीतः पन्थानं २
अमुष्य त्वत्सेवा १२
अयत्नादापाद्य ११
असितगिरिसमं ३२
असिद्धार्था नैव १५
असुरसुर मुनीन्द्रै ३३
अहरहरनवद्यं ३५
आसमाप्तमिदं ३९
इत्येषा वाङ्मयी ४०
एककालं द्विकालं ४२
किमीहः किंकायः ५
कुसुम दशन नामा ३७
कृश परिणति ३१
क्रतौ सुप्तेजाग्रत् २०
क्रियादक्षो दक्षः २१
तव तत्वं न जानामि ४१
तवैश्वर्यं यत्तत् ४
तवैश्वर्यं यत्नात् १०
त्रयी सांख्यं योगः ७
त्रयीं तिस्रो वृत्तीः २७

त्वमर्कस्त्वं सोमः २६
दीक्षादानं तपः ३६
ध्रुवं कश्चित्सर्वं ९
नमोनेदिष्ठाय २९
प्रजानाथं नाथ २२
बहल रजसे ३०
भवः शर्वो रुद्रः २८
मधुस्फीता वाचः ३
मनः प्रत्यक्चित्ते २५
महिम्नः पारं ते १
मही पादाघातात् १६
महेशान्नापरो ३४
महोक्षः खट्वांगं ८
यदृद्धिं सुत्राम्णो १३
रथः क्षोणी यन्ता १८
वियद्व्यापी तारा १७
श्री पुष्पदन्त मुख ४३
सुरवर मुनिपूज्यं ३८
श्मशानेष्वाक्रीडा २४
स्वलावण्याशंसा २३
हरिस्ते साहस्रं १९

महिम्न स्तोत्रम्